रत्नावली ॥ ऊर्द्ध्वं लिखितः ॥ (यथा, रघुः ।६ ३२ ।)
"त्वष्ट्रेव यन्त्रोल्लिखितो विभाति" ॥)

उल्लेखः,पुं,(उत् + लिख् + घञ् ।) उच्चारणम् । कथनम् । इति स्मार्त्ताः ॥ (अलङ्कारभेदः ॥ तल्लक्षणं यथा, साहित्यदर्पणे १० परिच्छेदे ।
"क्वचिद्भेदाद्ग्रहीतॄणां विषयाणां तथा क्वचित् ।
एकस्यानेकधोल्लेखो यः स उल्लेख उच्यते" ॥
उदाहरणम् । "प्रियइति गोपवधूभिः शिशुरिति वृद्धैरधीशइति देवैः । नारायणइति भक्तैर्ब्रह्मेत्यग्राहि योगिभिर्देवः" ॥)

उल्लेखनं, क्ली, (उत् + लिख् + ल्युट् ।) वमनम् । इति रत्नमाला ॥ खननम् । यथा "भूमेरुल्लेखनं कुर्य्यात्" । उति स्मृतिः ॥ (यथा, मनुः ५।१२४ ।
"सम्मार्ज्जनोपाञ्जनेन सेकेनोल्लेखनेन च" ।)
उच्चारणम् । यथा,—
"मासपक्षतिथीनाञ्च निमित्तानाञ्च सर्व्वशः ।
उल्लेखनमकुर्व्वाणो न तस्य फलभाग्भवेत्" ॥
इति तिथ्यादितत्त्वम् ॥

उल्लोचः,पुं,(ऊर्द्ध्वं लोचति । उत् + लोच् + अच् । यद्वा ऊर्द्ध्वं लोच्यते । लोच् + घञ् । कुत्वन्तु न निष्ठायामनिट इति वचनात् । अस्य तु तन्न सेट्त्वात् ।) चन्द्रातपः । चाँदोया इति भाषा । तत्पर्य्यायः । वितानम् २ । इत्यमरः ॥

उल्लोलः, पुं, (उल्लोड़यतीति । लोड़ृ उन्मादे + णिच् + पचाद्यच् । डलयोरैक्यात् डस्य लः ।) महातरङ्गः । वड़ ढेउ इति भाषा । तत्पर्य्यायः । कल्लोलः २ । इत्यमरः ॥

उल्वं, क्ली, (उल्लीयते इति । उत् + लीङ् श्लेषणे उल्वादयश्च ४।९५ । इति उणादिसूत्रेण साधुः ।) जरायुः । इत्यमरः ॥ (यथा, गीतायां ३ । ३८ ।
"यथोल्वेनावृतो गर्भस्तथा तेनेदमावृतम्" ।
"जातमात्रं विशोध्योल्वाद्बालं सैन्धवसर्पिषा ।
प्रसूतिक्लेशितञ्चानु बलातैलेन सेचयेत्" ॥
इति वाभटः उत्तरस्थाने १ अध्याये उक्तवान् ॥
"अथ जातस्योल्वं मुखञ्च सैन्धवसर्पिषा विशोध्य घृताक्तं मूर्द्ध्नि पिचुं दद्यात् ततो नाभिनाड़ीमष्टाङ्गुलमायम्य सूत्रेण बद्ध्वा च्छेदयेत्तत्सूत्रैकदेशञ्च कुमारस्य ग्रीवायां सम्यग् बध्नीयात् । इति सुश्रुते शारीरस्थाने १० अध्याये ॥)

उल्वणं, त्रि, (उत् + वण + अच् । पृषोदरादित्वात् साधुः ।) व्यक्तम् । स्पष्टम् । इत्यमरः ॥
("श्लेष्मोल्वणा महामूला घना मन्दरुजः सिताः" ॥
इति वाभटे निदानस्थाने ७ अध्याये ॥
"हेतुलक्षणसंसर्गाद्विद्याद्द्वन्द्वोल्वणानि च" ।
इति रुग्विनिश्चयग्रन्थे अर्शोधिकारे ॥
प्रकाशः । निर्बाधः । यथा, रघुः । ४ । ३३ ।
"तस्यासीदुल्वणो मार्गः पादपैरिव दन्तिनः" ॥)

उशती, त्रि, (वश + शतृ + ङीप् । सम्प्रसारणम् ।) अकल्याणवाक् । इति शब्दरत्नावली ॥ (यथा, अघमर्षणमन्त्रे । "आपो हिष्ठा मयोभुवः स्तान ऊर्ज्जे दधातन महेरणाय चक्षसे । ॐ यो वः शिवतमोरसस्तस्य भाजयतेह नः । उशतीरिव मातरः" ॥)

उशनाः, [स्] पुं, (वश कान्तौ + "वशेः कनसिः" ।४।२३८। इति उणादिसूत्रेण कनसिः । ग्रह्यादित्वात् सम्प्रसारणम् ।) शुक्राचार्य्यः । इत्यमरः ॥ (यथा, कुमारे ३ । ६ ।
"अध्यापितस्योशनसापि नीतिं
प्रयुक्तरागप्रणिधिर्द्विषस्ते" ॥
स च दैत्यगुरुः । तथा च महाभारते ययातिसंवादे १ । ७६ । ६ ।
"पौरोहित्येन याज्यत्वे काव्यन्तूशनसं परे" ॥)

उशीक्, [ज्] पुं, (वष्टि उश्यते वा । वश कान्तौ + "वशः कित्" ।२।७१। इति उणादिसूत्रेण इजिः । सम्प्रसारणम् ।) अग्निः । घृतं । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

उशिक्, त्रि, (वश कान्तौ + इजि + सम्प्रसारणम् ।) कमनीयम् ॥
"न यद्वचश्चित्रपदं हरेर्यशो
जगत्पवित्रं प्रगृणीत कर्हिचित् ।
तद्वायसं तीर्थमुशन्ति मानसाः
न यत्र हंसा निरमन्त्युशिक्क्षयाः" ॥
इति श्रीभागवते १ स्कन्धे ५ अध्यायः । "चित्रपदमपि यद्वचो हरेर्यशो न प्रगृणीत तद्वायसं तीर्थं काकतुल्यानां कामिनां रतिस्थानं उशन्ति मन्यन्ते कुतः मानसाः सत्त्वप्रधाने मनसि वर्त्तमाना हंसाः यतयो यत्र न निरमन्ति कर्हिचिदपि नितरां न रमन्ते । उशिक्क्षयाः उशिक् कमनीयं ब्रह्म क्षयो निवासो येषां ते यथा प्रसिद्धा हंसाः मानससरसि चरन्तः कमनीयपद्मषण्डनिवासास्त्यक्तविचित्रान्नादियुक्ते उच्छिष्टगर्त्ते काकक्रीड़ास्थाने न रमन्ते इति शेषः" । इति तट्टीकायां श्रीधरस्वामी ॥ (कामयमानम् । यथा ऋग्वेदे १ । १३१ । ५ "आदित्ते अस्य वीर्य्यस्य चर्किरन्मदेषु वृषन्नुशिजो यदाविथ सखीयतो यदाविथ" । "उशिजो धर्म्मं कामयमानाः जनाः" । इति भाष्यम् ॥)

उशी, स्त्री, (वश + ई । सम्प्रसारणम् ।) वाञ्छा । इत्युणादिकोषः ॥

उशीनरः, पुं, (उशीप्रदो वाञ्छाप्रदो नरो यत्र ।) देशभेदः । तत्पर्य्यायः । गान्धारः २ । इति जटाधरः ॥ चन्द्रवंशोद्भवराजविशेषः । स तु शिविराजपिता । इति श्रीभागवतम् ॥ (पुरुवंशीयो नृपभेदः । यथा महाभारते । श्येनकपोतीये । ३ । १३० । २१-२३ ।
"उशीनरो वै यत्रेष्ट्वा वासवादत्यरिच्यत ॥
तां देवसमितिं तस्य वासवश्च विशाम्पते ।
अभ्यगच्छन्नृपवरं ज्ञातुमग्निश्च भारत ॥
जिज्ञासमानौ वरदौ महात्मानमुशीनरं ।
इन्द्रः श्येनः कपोतोऽग्निर्भूत्वा यज्ञेऽभिजग्मतुः" ॥
तस्य चारित्रं तत्रैव १३१ अध्याये द्रष्टव्यम् ॥)

उशीरः,पुं क्ली, (वश कान्तौ + "वशः कित्" ।४।३१ इति उणादिसूत्रेण ईरन् । सम्प्रसारणम् ।) वीरणमूलम् । वेनार मूल खस् इत्यादि भाषा । तत्पर्य्यायः । अभयम् २ नलदम् ३ सेव्यम् ४ अमृणालम् ५ जलाशयम् ६ लामज्जकम् ७ लघुलयम् ८ अवदाहम् ९ इष्टकापथम् १० । इत्यमरः ॥ उषीरम् ११ मृणालम् १२ लघु १३ लयम् १४ अवदानम् १५ इष्टम् १६ कापथम् १७ अवदाहेष्टकापथम् १८ इन्द्रगुप्तम् १९ । इति तट्टीकायां भरतादयः ॥ जलवासम् २० हरिप्रियम् २१ वीरम् २२ वीरणम् २३ समगन्धिकम् २४ रणप्रियम् २५ वीरतरु २६ शिशिरम् २७ शीतमूलकम् २८ वितानमूलकम् २९ जलमेदम् ३० सुगन्धिकम् ३१ सुगन्धिमूलकम् ३२ कम्बु ३३ । इति राजनिर्घण्टः ॥ अस्य गुणाः ।
घर्म्मदौर्गन्ध्यदाहपित्तरक्तरोगनाशित्वम् ।
इति राजवल्लभः ॥ अपिच । शीतलत्वम् । तिक्तत्वम् । मोहभ्रमापहत्वम् । ज्वरार्त्तिपित्तशमनकारित्वम् । जलसौगन्ध्यदायकत्वञ्च । इति राजनिर्घण्टः ॥ (यथा, शाकुन्तले ३ अङ्के । "प्रियंवदे ! कस्येदमुशीरानुलेपनं मृणालवन्ति च नलिनीदलानि नीयन्ते" । अस्य पर्य्यायगुणाः यथा,
"वीरणस्य तु मूलं स्यादुशीरं नलदञ्च तत् ।
अमृणालञ्च सेव्यञ्च समगन्धिकमित्यपि ॥
उशीरम्पाचनं शीतं स्तम्भनं लघु तिक्तकम् ।
मधुरं ज्वरहृद्वान्तिमदनुत्कफपित्तहृत् ॥
तृष्णास्रविषवीसर्पदाहकृच्छ्रव्रणापहम्" ।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

उशीरकं, क्ली, (उशीर + स्वार्थे कन् ।) वीरणमूलं । इति रत्नमाला ॥ (उशीरशब्देऽस्य विशेषो ज्ञेयः ।)

उशीरी,स्त्री, लघुकाशः । छोट काश्या इति भाषा । तत्पर्य्यायः । मिषिः २ गुड़ा ३ अश्वालः ४ नीरजः ५ शरः ६ । अस्य गुणाः । मधुरत्वम् । शीतत्वम् । पित्तदाहक्षयरोगनाशित्वञ्च । इति राजनिर्घण्टः ॥

उष उ बधे, दहि । इति कविकल्पद्रुमः ॥ (भ्वादिं-परं-सकं-सेट् ।) ऋस्वादिः । उ ओषित्वा उष्ट्वा । ओषति । क्त्वावेट्त्वान्नेमडीश्वीत्यादिना इमो निषेधे निष्ठायां उष्टः । दहि भस्मीकरणे । इति दुर्गादासः ॥

उष बधे । दहि । इति कविकल्पद्रुमः ॥ (भ्वादिं-परं-सकं-सेट् ।) ओषति । उषितः । दहि भस्मीकरणे । इति दुर्गादासः ॥ (यथा, मनुः ।९।२७३ ।
"यश्चापि धर्म्मसमयात् प्रच्युतो धर्म्मजीवनः ।
दण्डेनैव तमप्योषेत् स्वकाद्धर्म्माद्धि विच्युतम्" ॥)

उषं, क्ली, (उष + क ।) पांशुजलवणम् । इति रत्नमाला ॥

उषः, पुं, (उष + क ।) कामी । गुग्गुलुः । रात्रिशेषः । दिनम् । इति मेदिनी ॥ (दहनबधकर्त्तरि, त्रि ।) क्षारमृत्तिका । इति शब्दरत्नावली ॥

उषः, [स्] स्त्री, (ओषति नाशयत्यन्धकारम् । उष + "उषः किदिति" ४।२३३ । उणादिसूत्रेण असिः ।) प्रत्यूषः । इत्यमरः ।
("आसीदासन्ननिर्व्वाणः प्रदीपार्च्चिरिवोषसि" ।
इति रघुः । १२ । १ । तथा, माघे । ११।१७ ।
"पुनरुषसि विविक्तैर्मातरिश्वावचूर्ण्य" ।)